# कैवल्योपनिषत्

kaivalyopaniṣat

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाग्ँसस्तनूभिः । व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो
वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति
नो बृहस्पतिर्दधातु ॥ ॐ शान्तिः शान्तिः शान्तिः

Om bhadraṁ karṇebhiḥ śṛṇuyāma devāḥ | bhadraṁ paśyemākṣabhiryajatrāḥ |
sthirairaṅgaistuṣṭuvāg m̐ sastanūbhiḥ | vyaśema devahitaṁ yadāyuḥ | svasti na
indro vṛddhaśravāḥ | svasti naḥ pūṣā viśvavedāḥ | svasti nastārkṣyo
ariṣṭanemiḥ | svasti no bṛhaspatirdadhātu || om śāntiḥ śāntiḥ śāntiḥ

ॐ अथाश्वलायनो भगवन्तं परमेष्ठिनमुपसमेत्योवाच
अधीहि भगवो ब्रह्मविद्यां वरिष्ठां
सदा सद्भिः सेव्यमानां निगूढाम्।
ययाऽचिरात् सर्वपापं व्यपोह्य
परात्परं पुरुषं याति विद्वान् ॥ १ ॥

om athāshvalāyano bhagavantaṁ parameṣṭhinamupasametyovāca
adhīhi bhagavo brahmavidyāṁ variṣṭhāṁ
sadā sadbhiḥ sevyamānāṁ nigūḍhām |
yayā'cirāt sarvapāpaṁ vyapohya
parātparaṁ puruṣaṁ yāti vidvān ||1||

तस्मै स होवाच पितामहश्च

श्रद्धाभक्तिध्यानयोगादवेहि ॥ २ ॥

tasmai sa hovāca pitāmahaśca
śraddhābhaktidhyānayogādavehi || 2 ||

न कर्मणा न प्रजया धनेन

त्यागेनैके अमृतत्वमानशुः

परेण नाकन्निहितङ्गुहायाम् ।

विभ्राजते यद्यतयो विशन्ति ॥ ३ ॥

na karmaṇā na prajayā dhanena
tyāgenaike amṛtatvamānaśuḥ
pareṇa nākannihitaṅguhāyām
vibhrājateyadyatayo viśanti || 3 ||

वेदान्तविज्ञानसुनिश्चितार्थाः

सन्न्यासयोगाद्यतयश्शुद्धसत्त्वाः ।

ते ब्रह्मलोके तु परान्तकाले

परामृतात्परिमुच्यन्ति सर्वे ॥ ४ ॥

vedāntavijñānasuniścitārthās
sannyāsayogādyatayaśśuddhasattvāḥ |
te brahmaloke tu parāntakāle
parāmṛtātparimucyanti sarve | || 4 ||

विविक्तदेशे च सुखासनस्थः

शुचिः समग्रीवशिरःशरीरः ।

अत्याश्रमस्थः सकलेन्द्रियाणि

निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥ ५ ॥

viviktadeśe ca sukhāsanasthaḥ
śuciḥ samagrīvaśiraḥśarīraḥ |
atyāśramasthaḥ sakalendriyāṇi
nirudhya bhaktyā svaguruṁ praṇamya || 5 ||

हृत्पुण्डरीकं विरजं विशुद्धं

विचिन्त्य मध्ये विशदं विशोकम् ।

अचिन्त्यमव्यक्तमनन्तरूपम्

शिवं प्रशान्तममृतं ब्रह्मयोनिं ॥ ६ ॥

hṛtpuṇḍarīkaṁ virajaṁ viśuddhaṁ
vicintya madhye viśadaṁ viśokam |
acintyamavyaktamanantarūpam
śivaṁ praśāntamamṛtaṁ brahmayoniṁ || 6 ||

तमादिमध्यान्तविहीनमेकं

विभुं चिदानन्दमरूपमद्भुतम् ।

उमासहायं परमेश्वरं प्रभुं

त्रिलोचनं नीलकण्ठं प्रशान्तम् ।

ध्यात्वा मुनिर्गच्छति भूतयोनिं

समस्तसाक्षिं तमसः परस्तात् ॥ ७ ॥

tamādimadhyāntavihīnamekaṁ
    vibhuṁ cidānandamarūpamadbhutam |
umāsahāyaṁ parameśvaraṁ prabhuṁ
    trilocanaṁ nīlakaṇṭhaṁ praśāntam |
dhyātvā munirgacchati bhūtayoniṁ
    samastasākṣiṁ tamasaḥ parastāt || 7 ||

स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ।
स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः ॥ ८ ॥

sa brahmā sa śivaḥ sendraḥ so'kṣaraḥ paramaḥ svarāṭ |
sa eva viṣṇuḥ sa prāṇaḥ sa kālo'gniḥ sa candramāḥ || 8 ||

स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् ।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥ ९ ॥

sa eva sarvaṁ yadbhūtaṁ yacca bhavyaṁ sanātanam |
jñātvā taṁ mṛtyumatyeti nānyaḥ panthā vimuktaye || 9 ||

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
सम्पश्यन्ब्रह्म परमं याति नान्येन हेतुना ॥ १० ॥

sarvabhūtasthamātmānaṁ sarvabhūtāni cātmani |
sampaśyanbrahma paramaṁ yāti nānyena hetunā || 10 ||

आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ज्ञाननिर्मथनाभ्यासात्पाशं दहति पण्डितः ॥ ११ ॥

ātmānamaraṇiṁ kṛtvā praṇavaṁ cottarāraṇim |
jñānanirmathanābhyāsātpāśaṁ dahati paṇḍitaḥ || 11 ||

स एव मायापरिमोहितात्मा

शरीरमास्थाय करोति सर्वम् ।

स्त्रियन्नपानादिविचित्रभोगैः

स एव जाग्रत्परितृप्तिमेति ॥ १२ ॥

sa eva māyāparimohitātmā
śarīramāsthāya karoti sarvam |
striyannapānādivicitrabhogaiḥ
sa eva jāgratparitṛptimeti || 12 ||

स्वप्ने स जीवः सुखदुःखभोक्ता

स्वमायया कल्पितजीवलोके ।

सुषुप्तिकाले सकले विलीने

तमोऽभिभूतः सुखरूपमेति ॥ १३ ॥

svapne sa jīvaḥ sukhaduḥkhabhoktāa
svamāyayā kalpitajīvaloke |
suṣuptikāle sakale vilīne
tamo'bhibhūtaḥ sukharūpameti || 13 ||

पुनश्च जन्मान्तरकर्मयोगात्

स एव जीवः स्वपिति प्रबुद्धः ।

पुरत्रये क्रीडति यश्च जीवः

ततस्तु जातं सकलं विचित्रम् ।

आधारमानन्दमखण्डबोधं

यस्मिँल्लयं याति पुरत्रयं च ॥ १४ ॥

punaśca janmāntarakarmayogāt
sa eva jīvaḥ svapiti prabuddhaḥ |
puratraye krīḍati yaśca jīvaḥ
tatastu jātaṁ sakalaṁ vicitram |
ādhāramānandamakhaṇḍabodhaṁ
yasmiṁ̐llayaṁ yāti puratrayaṁ ca || 14 ||

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ १५ ॥

etasmājjāyate prāṇo manaḥ sarvendriyāṇi ca |
khaṁ vāyurjyotirāpaḥ pṛthivī viśvasya dhāriṇī || 15 ||

यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् ।
सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् ॥ १६ ॥

yatparaṁ brahma sarvātmā viśvasyāyatanaṁ mahat |
sūkṣmātsūkṣmataraṁ nityaṁ tattvameva tvameva tat || 16 ||

जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते ।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ १७ ॥

jāgratsvapnasuṣuptyādiprapañcaṁ yatprakāśate |
tadbrahmāhamiti jñātvā sarvabandhaiḥ pramucyate || 17 ||

त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥ १८ ॥

triṣu dhāmasu yadbhogyaṁ bhoktā bhogaśca yadbhavet |
tebhyo vilakṣaṇaḥ sākṣī cinmātro'haṁ sadāśivaḥ || 18 ||

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।

मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ १९ ॥

mayyeva sakalaṁ jātaṁ mayi sarvaṁ pratiṣṭhitam |
mayi sarvaṁ layaṁ yāti tadbrahmādvayamasmyaham || 19 ||

अणोरणीयानहमेव तद्वन्-

  महानहं विश्वमहं विचित्रम् ।

पुरातनोऽहं पुरुषोऽहमीशो

  हिरण्मयोऽहं शिवरूपमस्मि ॥ २० ॥

aṇoraṇīyānahameva tadvan--
  mahānahaṁ viśvamahaṁ vicitram |
purātano'haṁ puruṣo'hamīśo
  hiraṇmayo'haṁ śivarūpamasmi || 20 ||

अपाणिपादोऽहमचिन्त्यशक्तिः

  पश्याम्यचक्षुः स शृणोम्यकर्णः ।

अहं विजानामि विविक्तरूपो

  न चास्ति वेत्ता मम चित्सदाऽहम् ॥ २१ ॥

apāṇipādo'hamacintyaśaktiḥ
  paśyāmyacakṣuḥ sa śṛṇomyakarṇaḥ |
ahaṁ vijānāmi viviktarūpo
  na cāsti vettā mama citsadā'ham || 21 ||

वेदैरनेकैरहमेव वेद्यो

वेदान्तकृद्वेदविदेव चाहम् ।

न पुण्यपापे मम नास्ति नाशो

न जन्म देहेन्द्रियबुद्धिरस्ति ॥ २२ ॥

vedairanekairahameva vedyo
vedāntakṛdvedavideva cāham |
na puṇyapāpe mama nāsti nāśo
na janma dehendriyabuddhirasti || 22 ||

न भूमिरापो न च वह्निरस्ति

न चानिलो मेऽस्ति न चाम्बरं च ।

एवं विदित्वा परमात्मरूपं

गुहाशयं निष्कलमद्वितीयम् ॥ २३ ॥

समस्तसाक्षिं सदसद्विहीनं

प्रयाति शुद्धं परमात्मरूपम् ॥ २४ ॥

na bhūmirāpo na ca vahnirasti
na cānilo me'sti na cāmbaraṁ ca |
evaṁ viditvā paramātmarūpaṁ
guhāśayaṁ niṣkalamadvitīyam || 23 ||
samastasākṣiṁ sadasadvihīnaṁ
prayāti śuddhaṁ paramātmarūpam || 24 ||

इति प्रथमः खण्डः ॥

iti prathamaḥ khaṇḍaḥ ||

यः शतरुद्रीयमधीते सोऽग्निपूतो भवति सुरापानात्पूतो भवति ब्रह्महत्यात्पूतो भवति कृत्याकृत्यात्पूतो भवति। तस्माद्विमुक्तमाश्रितो भवति। अत्याश्रमी सर्वदा सकृद्वा जपेत्॥

अनेन ज्ञानमाप्नोति संसारार्णवनाशनम्। तस्मादेवं विदित्वैनं कैवल्यं फलमश्नुते कैवल्यं फलमश्नुत इति॥

yaḥ śatarudrīyamadhīte so'gnipūto bhavati surāpānātpūto bhavati brahmahatyātpūto bhavati kṛtyākṛtyātpūto bhavati। tasmādavimuktamāśrito bhavati। atyāśramī sarvadā sakṛdvā japet ।।

anena jñānamāpnoti saṁsārārṇavanāśanam । tasmādevaṁ viditvainaṁ kaivalyaṁ phalamaśnute kaivalyaṁ phalamaśnuta iti ।।

इत्यथर्ववेदे कैवल्योपनिषत्समाप्ता।

ityatharvavede kaivalyopaniṣat samāptā ।